Roll No. ....................

**905**

# कक्षा 9वीं अर्द्ध वार्षिक परीक्षा, 2024-25

[512]

## SANSKRIT

## संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks: 75]

*निर्देशाः –*

*(1) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(2) प्रश्नानां सम्मुखे अंकाः प्रदत्ताः।*

*(3) सर्वेषां प्रश्नानां संस्कृतेनैव उत्तराणि लेखनीयानि।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (1×6=6)

(i) द्विगु समासस्य उदाहरणम् अस्ति –
(अ) अनुरूपम् (ब) रामकृष्णौ
(स) त्रिभुवनम् (द) अनादिः

(ii) 'यथाशक्तिः' पदे समासः अस्ति –
(अ) कर्मधारयः (ब) अव्ययीभावः
(स) द्विगुः (द) द्वन्द्वः

(iii) 'चौरभयम्' पदस्य समास – विग्रहः अस्ति –
(अ) चौरात् भयम् (ब) चौरेण भयम्
(स) चौरम् भयम् (द) चौराय भयम्

(iv) 'गुणसंधेः' उदाहरणम् अस्ति –
(अ) सज्जनः (ब) महीशः
(स) विद्यालयः (द) हितोपदेशः

(v) 'ममैव' पदे सन्धिः भवति –
(अ) वृद्धिसंधिः (ब) गुणसंधिः
(स) यण्संधिः (द) दीर्घसंधिः

(vi) 'पुस्तकालयः' पदस्य संधिविच्छेदः अस्ति –
(अ) पुस्तका + लयः (ब) पुस्तकः + लयः
(स) पुस्तक + आलयः (द) पुस्त + कालयः

प्र.2 कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत – (1X6=6)

(i) तृतीया विभक्तेः एकवचनरूपं .................................... भवति। (रामाय / रामेण)

(ii) रमायै पदे .................................... विभक्तिः भवति। (पंचमी / चतुर्थी)

(iii) फलानि पदे .................................... अस्ति। (एकवचनम् / बहुवचनम्)

(iv) बालकशब्दस्य पंचमी विभक्तेः रूपं .................................... भवति। (बालके / बालकात्)

(v) 'बालकः कुत्र गच्छति' पदे .................................... अव्ययः अस्ति। (कुत्र / बालकः)

(vi) 'ईश्वरः सर्वत्र विद्यते' इत्यत्र .................................... अव्ययः अस्ति। (विद्यते / सर्वत्र)

प्र.3 शुद्धवाक्यानां समक्षम् आम् अशुद्धवाक्यां समक्षं न इति लिखत – (1X6=6)

(i) 'मधुरं फलम्' इत्यत्र 'फलम्' विशेष्यपदं न अस्ति।

(ii) 'विशालः वृक्षः' इत्यत्रः वृक्षः विशेषणं न अस्ति।

(iii) 'भ्रमराणाम्' पदस्य पर्यायपदम् अलीनाम् अस्ति।

(iv) 'तटे' पदस्य पर्यायपदं तीरे न अस्ति।

(v) 'सूर्यास्तः' पदस्य विलोमपदं 'सूर्योदयः' अस्ति।

(vi) हसितुम् पदस्य विलोमपदं 'रोदितुम्' न अस्ति।

प्र.4 उचितं युग्ममेलनं कुरुत – (1X6=6)

| (अ) | | (ब) | |
|---|---|---|---|
| (i) | दृश् | (क) | गच्छति |
| (ii) | गम् | (ख) | क्त्वा |
| (iii) | मध्यमपुरुषः | (ग) | पठितुम् |
| (iv) | वदतु | (घ) | पश्यति |
| (v) | तुमुन् | (ङ) | लोटलकारः |
| (vi) | गत्वा | (च) | भवसि |

प्र.5 एकपदेन उत्तरं लिखत – (1X6=6)

(i) 'अनुगच्छति' पदे उपसर्गः अस्ति?

(ii) अत्याचारः पदे उपसर्गः अस्ति?

(iii) तुला कीदृशी आसीत्?

(iv) आयतलोचना का अस्ति?

(v) अजातशिशुः कुत्र सुरक्षितः तिष्ठति?

(vi) श्रवणीयम् पदे प्रत्ययः अस्ति?

प्र.6 प्रकृतेः प्रमुखतत्वानि कानि सन्ति? (2)

<u>अथवा</u>

स्वार्थान्धः मानवः किं करोति?

प्र.7 जटायो! पश्य इति का वदति? (2)

<u>अथवा</u>

अन्ते तपोदत्तः विद्याग्रहणाय कुत्र गतः?

प्र.8 देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः किं व्यचिन्तयत्? (2)

<u>अथवा</u>

भग्नमनोरथः बालः किम् अचिन्तयत्?

प्र.9 सरोवराणां हानिः कदा भवति? (2)

<u>अथवा</u>

कालः कस्य रसं पिबति?

प्र.10 बालिकया पूर्वं कीदृशः काकः न दृष्टः आसीत्? (2)

अथवा

कविः वाणीं किं कथयति?

प्र.11 अधोलिखितेषु अशुद्ध – वाक्येषु शुद्धिं कुरुत – (कोऽपि द्वौ) (1X2=2)

(i) सः पठामि।

(ii) गणेशं नमः।

(iii) बालकाः गच्छति।

प्र.12 निर्देशानुसारं वाच्य – परिवर्तनं कुरुत – (कोऽपि द्वौ) (1X2=2)

(i) बालकः विद्यालयं गच्छति (कर्मवाच्ये)

(ii) मया पठ्यते (कर्तृवाच्ये)

(iii) रामेण फलं खाद्यते (कर्तृवाच्ये)

प्र.13 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वौ) (1X2=2)

(i) तण्डुलान् मा भक्षय।

(ii) धन्यवाद मातुल! याम्यधुना।

(iii) हा विधे! किमिदं मया कृतम्?

प्र.14 रेखांकितपदं स्वीकृत्य प्रश्न–निर्माणं कुरुत – (कोऽपि द्वौ) (1X2=2)

(i) <u>सूर्योदयात्</u> पूर्वमेव बालिका तत्रोपस्थिता।

(ii) <u>मोदकानि</u> पूजानिमित्तानि रचितानि आसन्।

(iii) पर्यावरणरक्षणं <u>धर्मस्य</u> अङ्गम् अस्ति।

प्र.15 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य – पुस्तकात् एकं सुभाषितं लिखत। (2)

प्र.16 प्रदत्तैः वाक्यैः घटनाक्रमानुसारं लिखत – (½X4=2)

(i) सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमंदिरं गच्छति।

(ii) उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः।

(iii) मल्लिका पूजार्थं मोदकानि रचयति।

(iv) उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति।

प्र.17 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – (कोऽपि चत्वारः) (½X4=2)

(मानुषाणां, निर्धनमातुः, तपश्चर्यया, क्षयिणी, वाणीम्, जीवनसुखं)

(i) प्रकृतिः ........................................ प्रददाति।

(ii) तपोदत्तः ........................................ विद्यामवाप्तुं प्रवृत्तोऽस्ति।

(iii) कुक्कुरः ........................................ मित्रम् अस्ति।

(iv) बालिका ........................................ दुहिता आसीत्।

(v) कविः ........................................ सम्बोधयति।

(vi) आरम्भगुर्वी ........................................ क्रमेण।

प्र.18 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।

प्रश्नाः –

(i) आत्मनः प्रतिकूलानि केषां न समाचरेत्?

(ii) किं श्रूयताम्?

(iii) 'श्रुत्वा' पदे प्रत्ययः अस्ति।

<u>अथवा</u>

वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः।।

प्रश्नाः –

(i) यत्नेन किं संरक्षेत्?

(ii) वित्ततः क्षीणः नरः कीदृशः भवति?

(iii) कं येति याति च?

प्र 19 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेनैव लिखत – (3)

(मल्लिका मोदकानि साधयन्ती मन्दस्वरेण शिवस्तुतिं करोति) (ततः प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः) चन्दनः – अहा! सुगन्धस्तु मनोहर (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नः भूत्वा) आस्वादयामि तावत् (मोदकं ग्रहीतुमिच्छति) मल्लिका – (सक्रोधम्) विरम। विरम। मा स्पृश एतानि मोदकानि।

प्रश्नाः –

(i) मोदकगन्धं कः अनुभवन्?

(ii) मल्लिका मन्दस्वरेण किं करोति?

(iii) सुगन्धः कीदृशः अस्ति।

अथवा

चन्दनः – किमर्थं क्रुध्यसि! तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि, किं न जानासि त्वमिदम्?

मल्लिका – सम्यग् जानामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति।

चन्दनः – तर्हि, शीघ्रमेव पूजनं सम्पादय। प्रसादं च देहि।

मल्लिका – भोः! अत्र पूजनं न भविष्यति। अहं स्वसखीभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं गमिष्यामि।

प्रश्नाः –

(i) एतानि मोदकानि कानि सन्ति?

(ii) स्वसखिभिः सह मल्लिका कुत्र गमिष्यति?

(iii) शीघ्रमेव पूजनं सम्पादय इति कः कथयति?

प्र.20 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (3)

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तं तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धा। तं निवारयन्ती सा प्रार्थयत् – "तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते"। स्वर्णपक्षः काकः प्रोवाच मा शुचः। सूर्योदयात्प्राग् ग्रामाद्बहिः पिप्पलवृक्षमनु त्वया आगन्तव्यम्।

प्रश्नाः –

(i) बालिका किमर्थं रोदितुम् आरब्धा?

(ii) स्वर्णकाकः कया न पूर्वं दृष्टः?

(iii) कः तण्डुलमूल्यं दास्यति?

<u>अथवा</u>

चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा सा विस्मयं गता। श्रान्तां तां विलोक्य काकः अवदत् – "पूर्वं लघुप्रातराशः क्रियताम् – वद त्वं स्वर्णस्थाल्यां भोजनं करिष्यसि किं वा रजतस्थाल्याम् उत् ताम्रस्थाल्याम्"? बालिका अवदत् – ताम्रस्थाल्याम् एव अहं निर्धना भोजनं करिष्यामि तदा सा आश्चर्यचकिता सञ्जाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम् न एतादृशम् स्वादु भोजनम – द्यावधि बालिका खादितवती।

प्रश्नाः –

(i) का स्वादु भोजनं खादितवती?

(ii) बालिका भवने किमर्थं विस्मयं गता?

(iii) श्रान्तां तां विलोक्य काकः किम् अवदत्?

प्र.21 अधोलिखितं अपठित – गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (4)

रामायणं मम अभीष्टतमः ग्रन्थः। अस्य लौकिक – काव्यस्य प्रादुर्भावः वैदिकवाङ्मयानन्तरम् अभवत्। रामायणं लौकिक – संस्कृतभाषानिबद्धमयम् आदिकाव्यम् इति कथ्यते। अस्य ग्रन्थस्य रचना आदिकविना कृता। अस्मिन् महाकाव्ये भगवतो रामचन्द्रस्य चरितं वर्णितं वर्तते। अस्मिन् काव्ये सप्तकाण्डानि सन्ति। दशरथनन्दनो रामो मानवतायाः आदर्शभूतः। त्रेतायुगे जातस्य परमादर्शभूतस्य रघुवंशस्य विविधाः कथाः जनैः सावधानतया कथ्यन्ते श्रूयन्ते च। महर्षिणा वाल्मीकिना रघुवंशचूडामणेः श्रीरामभद्रस्य सर्वा कथा रामायणे विलिखिता। बालकाण्डतः उत्तरकाण्डावधिः श्रीरामचन्द्रस्य कथा मुनिना रामायणे विलिखिता।

प्रश्नाः –

(i) रामायणस्य रचना केन कृता?

(ii) रामायणे कस्य चरितं वर्णितम् अस्ति?

(iii) काः कथाः जनैः सावधानतया श्रूयन्ते?

(iv) महर्षिणा वाल्मीकिना कस्य कथा रामायणे विलिखिता।

प्र.22 स्व–प्राचार्यस्य कृते अवकाशार्थं प्रार्थना पत्रं लिखत। (4)

अथवा

स्वमित्रं प्रति भगिनीविवाहस्य निमन्त्रणपत्रं लिखत।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां निबंधं लिखत – (4)

(i) महाकवि कालिदासः

(ii) पर्यावरणम्

(iii) संस्कृतभाषायाः महत्वम्

(iv) सदाचारः

---